# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-३ (SEM-5) | प्रश्नपत्र-३ | गुणाः - ७० |
| विषयः- साहित्यम् | **Old Course** | समयः - ११ तः ०२ |
| दिनाङ्कः - २६/११/२०१६ | सन्दर्भग्रन्थः - काव्यमीमांसा ( ३,४ अध्यायौ ) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ यथेच्छम् एकस्य उत्तरं लेख्यम् ।** **१०**

१. साहित्यशास्त्रे राजशेखरस्य स्थानं महत्त्वं च प्रतिपादयत ।

२. राजशेखरस्य रचनानां परिचयो दातव्यः ।

**प्र-२ द्वयोः टिप्पणी लेख्या ।** **१०**

१. राजशेखरस्य जीवनपरिचयः ।

२. राजशेखरस्य कालनिर्धारणम् ।

३. कविशिक्षाग्रन्थोल्लेखः ।

४. साहित्यसम्प्रदायोल्लेखः ।

**प्र-३ पञ्चानाम् एकवाक्येन उत्तराणि लिखत ।** **०५**

१. काव्यमीमांसायां कति अध्यायाः?

२. यायावरीयः कः?

३. द्वितीयोऽध्यायः कः?

४. प्रथमोऽध्यायः कः?

५. काव्यपुरुषयोत्पत्तिः कस्मिन् अध्याये वर्तते?

६. राजशेखरः कस्य पौत्रः?

७. राजशेखरः कस्य राज्ञः आश्रितः कविः आसीत्?

**॥ द्वितीयान्वितिः ॥**

**प्र-४ द्वयोः व्याख्या कार्या ।** **०८**

१. प्रथयति पुरः प्रज्ञाज्योतिर्यथार्थपरिग्रहे तदनु जनयत्यूहापोहक्रियाविशदं मनः ।
अभिनिविशते तस्मात्तत्त्वं तदेकमुखोदयं सह परिचयो विद्यावृद्धैः क्रमादमृतायते ॥

२. कवेरुपकुर्वाणा कारयित्री । साऽपि त्रिविधा सहजाऽऽहार्यौपदेशिकी च ॥

३. सन्ति पुस्तकविन्यस्ताः काव्यबन्धा गृहे गृहे द्वित्रास्तु भावकमनःशिलापट्टनिकुट्टिताः ॥

**प्र-५ एकस्य सविस्तरमुत्तरं लेखनीयम् ।** **०८**

१. ग्रन्थोक्तदिशा शिष्यप्रकारान् विवेचयन्तु ।

२. राजशेखरदिशा भावकस्य विशेषताः वर्णयन्तु ।

**प्र-६ यथेच्छं टिप्पणीद्वयं समाधेयम् ।** **०४**

१. काव्यकर्मणि समाधिः ।

२. अरोचकिनः ।

३. उत्कर्षः श्रेयान् ।

४. श्यामदेवः ।

**प्र-७ पञ्चानामेकवाक्येन उत्तरं लिखन्तु ।** **०५**

१. का मतिः?

२. कः अभ्यासः?

३. का प्रतिभा?

४. का औपदेशिकी?

५. चतुर्थस्य अध्यायस्य कोऽर्थः?

६. यायावरीयस्य मतानुसारं काव्ये हेतुः कः?

**॥ तृतीयान्वितिः ॥**

**प्र-८ द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

१. कवेः संव्रियतेऽशक्तिर्व्युत्पत्या काव्यवर्त्मनि । वैदग्धीचितचित्तानां हेया शब्दार्थगुम्फना ॥

२. आत्मारामा विहितरतयो निर्विकल्पे समाधौ, ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्तं मोहान्धः कथमयममुं वेत्तुं देवं पुराणम् ॥

३. इयमशक्तिर्न पुनः पाकः इत्यवन्तिसुन्दरी । यदेकस्मिन्वस्तुनि महाकवीनामनेकोऽपि पाठः परिपाकवान्भवति, तस्माद्रसोचितशब्दार्थसूक्तिनिबन्धनः पाकः ।

**प्र-९ एकस्य निबन्धात्मकमुत्तरं लिखन्तु ।** **०८**

१. का व्युत्पत्तिः? इति विलिख्य ग्रन्थोक्तदिशा प्रतिभाव्युत्पत्त्योः श्रेयाश्रेयत्वं प्रतिपादयन्तु ।

२. राजशेखरानुसारं कः पाकः? इति विलिख्य पाकभेदान् लिखन्तु ।

**प्र-१० द्वयोः टिप्पणी विधेया ।** **०२**

१. काव्यकविः ।

२. हृदयकविः ।

**प्र-११ द्वयोः एकवाक्येन उत्तरं लिखन्तु ।** **०२**

१. कवेरवस्थाः कति?

२. कविराजः कः?

३. मङ्गलानुसारं कः पाकः?